# Shri Gitavali 2

# श्रीगीतावली २

## Document Information

Text title : gItAvalI2

File name : gItAvalI2.itx

Category : vishhnu, krishna, vishvanAthachakravartin, stavAmRRitalaharI

Location : doc_vishhnu

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीगीतावली २

प्रभो कृष्णचैतन्य गौराङ्ग
    विश्वम्भर श्रीशाचीनन्दन प्रेमसिन्धो ।
हरे कृष्ण गोपाल गोविन्द
    नन्दात्मज गोष्ठगोपीजनप्राणबन्धो ॥ धृ॥

(१)

पायय कृपया प्रेमसुधा मां
    कारय निजसेवा बहुधा माम् ।
श्रीगोविन्द मदनगोपाल गोपीनाथ
    श्रीकृष्ण हरे व्रजजनगीतलीलागाथ ॥

मधुरिमगरिमसरसकरुणालय
    लोचनकोणविकाशम् ।
मामनुभावय भावय निजगुणरूप
    कलापविलासम् ॥

श्रीवृन्दावनकुञ्जविहारिणि
    राधे हरिदयिते ।
नय निजचरणसरोजतलं
    मामुररीकुरु ललिते ॥ १॥

(२)

राग कानडा
वन्दे श्रीवृषभानुसुतापद !
कमलनयनलोचनसम्पद ॥

नखर मुकुरजित कोटिसुधाकर ।
माधव हृदयचकोर मनोहर ॥

कमलानुत सौभगरेखाञ्चित ।
ललितादिकरयावकरञ्जित ॥

संसेवया गिरिधर मतिमण्डित ।
रासविलास नटनरसपण्डित ॥

(३)

राग तुडि
इह नववञ्जुलकुञ्जे ।
कुरुवककुसुमसुषमनवगुञ्जे ॥

तामभिसारय धीराम् ।
त्रिजगदतुलगुणभरिमगभीराम् ॥

गुरुमङ्गीकुरु भारम् ।
विरचय मदनमहोदधिपारम् ॥

भवतीं गरिमवलम्बे ।
मदुचितमिह कुरु विगतविलम्बे ॥

इति गदिता मधुरिपुणा ।
त्वरितमगादियमतिनिपुणा ॥

रहसि सरसि चटु राधा ।
समबोधयदघहर पुरुबाधाम् ॥

हृदि सखि ! वससि मुरारेः ।
ज्वलयसि तदपि किमकृतविचारे ॥

अधुना दृशि च बलवन्ती ।
शिशिरय तदमितरुचि विभवन्ती ॥

हरिवल्लभ गिरममलाम् ।
श्रवसि रचय सुमनसमिव मृदुलाम् ॥

(४)

केदार राग
सुन्दरि कलय सपदि निजचरितम् ।
त्वमतनुकार्मणविदुषि रसिकममूं
आकर्षसि गुणकलितम् ॥

(५)

निजमन्दिरमनुपदलसदिन्दिरं
अपि परिहाय विलासी ।
अभवदपास्तसमस्तकलं गिरि
कन्दरतटवनवासी ॥

भवदनुरागनृपोऽकृत हा किं
अकारणवैरमपारम् ।
प्रहरति मनसिज धन्वामुना
प्रहितो यदमुं कति वारम् ॥

जीवयितुं यदि कान्तमनङ्ग
गुणालयमिच्छसि कान्ते ।
अभिसर सम्प्रति भामिनि
हरिवल्लभभुवि तान्ते ॥

(६)

वराडी
मा तुद मुञ्च पटान्तमिति स्फुटकुटिलमुखं स्मितमिश्रम् ।
षाडवमिव प्रीतिश्रितभुजबलराशिरघारिरकृष्टम् ॥

सखि हे ! पश्य नयनसुखसारम् ।
रसिकमुकुटतनुयुगलमधि श्रितबहुविधमदनविकारम् ॥

चटुलितविकटचिल्लिधनुरर्पितशानितशोणकटाक्षा ।
तर्जति दयितमिमं तदपि प्रतिपरिरम्भणरसदक्षा ॥

मुखमतिपूतमिदं युवति व्रजरसनारसितमखण्डम् ।
स्पर्शय मा दयितेत्यभिधाय पुनर्धयति प्रियगण्डम् ॥

विरम सतीत्वमजनि मम खण्डितमिति हितमपि तव सिद्धम् ।
इति सा रुषेव रदैर्निजवल्लभमधरे रचयति विद्धम् ॥

(७)

हरिभुजकलितमधुरमृदुलाङ्गा ।
तदमलमुखशशिविलसदपाङ्गा ॥

राधा ललितविलासा ।
अधि रतिशयनमजनि मृदुहासा ॥

असदृकृदुदञ्चितघनपरिरम्भा ।
खरनखराङ्कुशोदितकुचकुम्भा ॥

स्मरशरखण्डितधृतिमतिलज्जा ।
प्रेमसुधाजलधिकृतमज्जा ॥

सरभसवलितरदनच्छदपाना ।
श्रमसलिलाप्लुतवपुरपिधाना ॥

कङ्कणकिङ्किणिझङ्कृतरुचिरा ।
परिमलमिलितमधुव्रतनिकरा ॥

मृगमदरसचर्चितनवनलिना ।
कृतिधरतिमितचिकुरवृतवदना ॥

वल्लभरसिककलारससारा ।
सफलीकृतनिजमधुरिमभारा ॥

(८)

कृष्णा नन्दगोपनन्दना ।
जय कृष्णमन्दहास्यवदना ॥

कङ्कणकिङ्किणि केयूरभूषणकौस्तुभमणिराजिता ।

कृष्णा पद्मनिन्दिचरणा ।
वञ्जुलसद्मवीथिचलना ॥

इन्दुकोटिजयिनखमणिदर्पणदण्डितघनतिमिरा ॥

कृष्णा राजदङ्कललिता ।
मदगजराजवर्यचलिता ॥

मञ्जुलशिञ्जितमञ्जीरचुम्बितचञ्चलमाल्यतटा ॥

कृष्णा हाटकरुचिवसना ।
नवरसनाटकमणिरसना ॥

नाभिसरोवरतीरसमुत्थितवीचिवलित्रितया ॥

कृष्णा कुन्ददामचपला ।
बन्धुरतुन्दशोभितरला ॥

कृष्णा पीनबाहुयुगला ।
नियतनवीनरङ्गकुशला ॥

राधिका सुखसागरनागरसुन्दराब्जनयना ॥

कृष्णा कर्णलम्बिकुण्डला ।
कुवलयवर्णनिन्दिकुन्तला ॥

भालरञ्जितिलकावलिनासिकादम्भरोचिरतुला ॥

कृष्णा वंशवाद्यचतुरा ।
लसदवतंसपिञ्छमधुरा ॥

नीलखञ्जघनपुञ्जजिष्णुनव्यसुषमा ॥

कृष्णा रासलास्यविदिता ।
मधुरविलासनित्यमुदिता ॥

(९)

श्रीराग विहागडा
मधुरगोकुलनन्दन छविल वृन्दावनचन्द्र ।
मुरलीधर मधुसूदन माधव गोपीनाथ मुकुन्द ।

केलिकलानिधि कुञ्जविहारिन् गिरिधर आनन्दकन्द ॥
राधे कृष्ण राधे ॥

(१०)

जय माधुर्यपताके श्रीराधे ।
जय वृषभानुसुते ॥

ललितादिसखिकुमुदावलिराके !
प्रेममहामृतभावितरसमयतनु गुणरूपकलापे ।
निजपरिजनपरिषदि मामुपनय कलितललितममताके ॥

(११)

नन्दसूनो कृष्ण गोविन्द ।
दृशमयि दिश मयि निजकृपया ।
मां जीवय मन्दस्मितसुधया ॥

पीतवसन मम कलय मनो ।
नव नीलनलिनकमनीयतनो ॥

वल्लवनगरवतंस विभो ।
वल्लभ मामुररीकुरु भोः ॥

इति महामहोपाध्यायश्रीविश्वनाथचक्रवर्तिविरचितं श्रीगीतावली समाप्ता ।

*Shri Gitavali 2*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*